दिनाङ्क :- 26.11.2026
प्रातः - 06:55

अथवार्ता:

प्रधानमन्त्री-प्रगतिसमीक्षोपवेशनम्

प्रधानमन्त्री नरेन्द्रमोदी 'प्रगतिः' इत्यस्य पञ्चपञ्चाशत्तमस्य उपवेशनस्य अध्यक्षतां कृतवान्। सक्रियशासनस्य समयबद्धकार्यनिष्पादनस्य च प्रोत्साहनार्थम् अयं मञ्चः निर्मितः अस्ति। ह्यः आयोजिते अस्मिन् उपवेशने प्रधानमन्त्रिणा मार्गनिर्माणम्, ऊर्जाक्षेत्रं रेलक्षेत्रं चेत्येतेषु पञ्च-महत्त्वपूर्णासु आधारभूतसंरचना-परियोजनासु समीक्षा कृता। एतासां परियोजनानां व्ययः आहत्य अष्टसप्ततिसहस्रकोटिरूप्यकेभ्यः अधिकः अस्ति। सः अवदत् यत् एतासां परियोजनानां समयबद्धं कार्यान्वयनम्, निर्माणकार्यस्य च उच्चगुणवत्तायाः पालनम् अत्यावश्यकम् अस्ति। श्रीमोदिना औद्योगिकप्रशिक्षणसंस्थानानां व्यवस्थायाः अपि समीक्षा कृता। उन्नतोन्नतैः औद्योगिकप्रशिक्षणसंस्थानैः पीएम्-सेतू इति प्रधानमन्त्रिकौशल-आजीविकाक्षमता-परिवर्तनयोजनायाः कार्यान्वयनस्य समीक्षापि अस्यां समाविष्टा आसीत्।

केन्द्रीयमन्त्रिमण्डलस्य निर्णयाः

कन्द्रीयमन्त्रिमण्डलेन निर्माणाधार-भूतसंरचनोपकरणानां निर्माणसम्बद्धस्य उद्योगतन्त्रस्य संवर्धनार्थं एकादशसहस्रकोटिरूप्यकाणां व्ययेन एका योजना अनुमोदिता। सूचनाप्रसारणमन्त्री अश्विनीवैष्णवः नवदिल्ल्यां मन्त्रिमण्डलस्य उपवेशने गृहीतानां निर्णयानां विषये सूचनां दत्तवान्। मन्त्री अवदत् यत् अस्याः योजनायाः उद्देश्यं स्वदेशे निर्माण-आधारभूतसंरचनयोः सम्बद्धोपकरणानां तेषां च घटकानां निर्माणस्य प्रोत्साहनम् अस्ति।

॥ विरामः ॥
संस्कृत-वार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते।
[प्रोमो - सोशल मीडिया]

यूरिया

प्रशासनेन राष्ट्रिय-यूरियानीतिः विंशतिः षड्विंशतिः इत्यस्य अन्तर्गतं ब्राउनफील्ड् इत्येतस्यां श्रेण्यां षड्-नूतनानां यूरियानिर्माणसंयन्त्राणां स्थापनायै अनुमोदनं प्रदत्तम्। एतेषु संयन्त्रेषु प्रायः चतुःपञ्चाशत्-सहस्रकोटिरूप्यकाणां निवेशः भविष्यति। अस्य निर्णयस्य उद्देश्यम् कृषिक्षेत्रस्य सुदृढीकरणम्, उर्वरकाणां पर्याप्तोपलब्धतायाः सुनिश्चितीकरणम् तथा यूरियोत्पादने स्वावलम्बनस्य प्राप्तिः अस्ति। रसायन-उर्वरकमन्त्रालयस्य अनुसारं प्रत्येकस्यां ब्राउनफील्ड् इति परियोजनायां प्रायः नवसहस्रकोटिरूप्यकाणां निवेशः अपेक्षितः अस्ति। एताभिः परियोजनाभिः यूरियोत्पादने भारतस्य आत्मनिर्भरतादिशि प्रयासः अग्रे वर्धिष्यते, आजीविकायाः अवसराश्च सृज्यन्ते।

संविधानदिवसः

अद्य संविधानदिवसः आचर्यते। नवचत्वारिंशदधिक-नवदश-शततमस्य वर्षस्य नवम्बरमासस्य षड्विंशति-दिनाङ्के संविधानसभया भारतस्य संविधानम् अङ्गीकृतम्। पञ्चदशाधिक-द्विसहस्रतमात् वर्षात् अयं दिवसः संविधानदिवसरूपेण आचर्यते। अस्य दिवसस्य उद्देश्यम् संवैधानिकजागरूकतायाः संवर्धनम्, उत्तरदायिनः नागरिकत्वस्य प्रोत्साहनम् तथा राष्ट्रस्य लोकतान्त्रिकमूल्यानां संरक्षणे सक्रियभागग्रहणस्य वर्धनम् अस्ति। अस्मिन्नवसरे संसदीयकार्यमन्त्रालयः 'मायगाव्' इति पटलस्य माध्यमेन संविधानस्य प्रस्तावनायाः अन्तर्जालीयवाचनस्य आयोजनं करोति। एतद्वाचनं द्वाविंशति-अनुसूचितभाषासु तथा आङ्ग्लभाषां समेत्य त्रयोविंशति-भाषासु भविष्यति !

महिलाहॉकी

महिलाहॉकीक्रीडायां भारतदलेन ह्यः सायङ्काले भोपालनगरे आयोजितायाः महिलानां एशियायाः हॉकी-चैम्पियन्स्-ट्रॉफी-प्रतियोगितायाः अन्तिमे चरणे जापानदलं चत्वारि शून्यम् इत्यङ्कान्तरालेन पराजितम्।

।। इति वार्ताः ।।